# संस्कृतवार्ता:

दिनाङ्क : 10.09.2025 सायम् - 06:20

आदौ-मुख्यवार्ता:

- प्रधानमन्त्रिण: श्रीनरेन्द्र-मोदिन: अध्यक्षतायां आर्थिक-कार्य-विषयाणां मन्त्रिमण्डलीय-समित्या अद्य नैका: महत्वपूर्णा: परियोजना: समनुमता:।
- नेपालसैन्यबलेन देशे विवर्धमानाम् अशान्तिं निध्याय सञ्चाररोधादेश: प्रवर्त्तितः। समस्तेऽपि देशे विस्तारित: सञ्चाररोधादेश:।
- भारतीय-ऋतु-विज्ञान-विभागेन आगामि पञ्च-दिवस-पर्यन्तं पूर्वीय-प्रायद्वीपीय-भारते प्रचण्डवृष्टे: सम्भावना व्यक्तीकृता।
- एशिया-चषकीय क्रिकेट-स्पर्धा-शृङ्खलायां, भारतम् अद्य सायं दुबई नगरे आयोजकं संयुक्त-अरब-अमीरात दलं विरुध्य निजाभियानं प्रवर्तयिष्यते।

-----------------------------------

मन्त्रिमण्डलीयसमिति:

प्रधानमन्त्रिण: श्रीनरेन्द्र-मोदिन: अध्यक्षतायां आर्थिक-कार्य-विषयाणां मन्त्रिमण्डलीय-समित्या अद्य नैका: महत्वपूर्णा: परियोजना: समनुमता:। अनया समित्या बिहारे, झारखण्डे, पश्चिमबंगाले च भागलपुर–दुमका–रामपुरहाट रेलखण्डस्य सप्त-सप्तत्युत्तर-एक-शत-किलोमीटर-मिताया: सुदीर्घ-रेल-पट्टिकाया: द्वि-पक्षीय-विस्तारणार्थं हरित-ध्वज-प्रदर्शन पूर्वकं अनुमति: प्रदत्ता। एतस्यां परियोजनायां प्रायः एकोन-सप्तत्युत्तर-एक-शताधिक-त्रि-सहस्र-कोटिकानि रूप्यकाणि व्ययीभविष्यन्ति। समित्या बक्सर–भागलपुर हाई-स्पीड कॉरिडोर इत्यस्य मकामा–मुंगेर खण्डे, द्व्यशीति-किलोमीटर-मितस्य लम्बायमानस्य चतुस्-पङ्क्ते: ग्रीनफील्ड-राजमार्ग-

निर्माणस्य कृते अपि स्वीकृति: दत्ता अस्ति। अस्य अनुमानित: व्यय: सप्त-चत्वारिंशदुत्तर-चतुश्शताधिक- चतुस्सहस्र-मितानि रुप्यकाणि सन्ति।

------------------------------------

## नेपालअस्थैर्यम्

नेपाले निरन्तरं अशान्ति: अस्थैर्यं च समेधतेतराम्। नेपाल-सैन्यबलेन अद्य सायं पञ्च-वादनं यावत् तत्र निषेधाज्ञा प्रवर्तितः आसीत् यद्धि विवर्ध्य सम्प्रति श्व: प्रातः षड् वादनं यावत् समस्ते देशे सञ्चार-रोधादेश: कल्पितः अस्ति। नेपाल-सैन्यबलेन प्रतिपाद्यते यद् एषः पदक्षेप: विरोध-प्रदर्शनकारिभि: दुरापादितानाम् अग्निकण्डानाम्, लुण्ठन-कर्मणां, हिंसक-गतिविधीनां च नियन्त्रणार्थं उत्थापित: अस्ति। अत्रान्तरे नेपलस्य त्रिभुवन-अन्ताराष्ट्रिय-विमान-पत्तनमेव निरन्तरं सोमवार-त: पिहितम् अस्ति अद्य सायम् यावत् च पिहितमेव स्थास्यति। ध्येयमस्ति यद् भारत-सर्वकारेण भारतीय-नागरिका: नेपालस्य यात्रां न कर्तुं परामृष्टा: सन्ति। ये च पूर्वतः एव तत्र नेपाले सन्ति ते सम्मृष्टा: सन्ति यत् ते निजावासेभ्य: बहिर् नैव गच्छेयुः अथ च स्थानीय-प्रशासनस्य भारतीय-दूतावासस्य च परामर्शानां दिङ्निर्देशानां च अनुपालनं कुर्युः। भारतीय दूतावासेन आपात्कालिक-सहायतार्थं दूरभाषसंख्यापि प्रख्यापिता अस्ति। भारतसर्वकारेण भारतीय-नागरिका: परामृष्टा: यत् ते यावत् स्थितिं सामान्यतां नैव गच्छति तावत् न कुर्युः नेपालयात्राम्।

------------------------------------

## नेपाल-सुरक्षाप्रकरणम्

प्रधानमन्त्रिणा श्रीनरेन्द्रमोदिना नेपालस्य घटनाक्रममालक्ष्य सुरक्षाप्रकरणानां मन्त्रिमण्डल-समितेरुपवेशनस्य अध्यक्षता कृता। सामाजिकान्तर्जालीय-सन्देशे तेन प्रोक्तम् यत् नेपालदेशे हिंसात्मकं विरोधाचरणं हृदयविदारकं वर्तते। अस्मिन् अवसरे प्रधानमन्त्री श्रीनरेन्द्र मोदी नेपालस्य स्थिति-विषये गम्भीरां चिन्ताम् अभिव्यक्तवान्। असौ प्रावोचत् यत् नेपाले हिंस्राचरणम् दु: खदायकं वर्तते तत्रत्या स्थिरता, शान्ति: समृद्धि: च अत्यन्तमेव आवश्यकी वर्तते। प्रधानमन्त्रिणा मोदिना नेपालस्य जनता शांति-सन्धारणार्थं निवेदिता: सन्ति।

------------------------------------

## अमेरिकीय-टैरिफ-शुल्क-वृद्धि:

अमेरिका-देशस्य राष्ट्रपति: डोनाल्ड ट्रम्प: यूरोपीय-संघम् अवोचत् यत् भारतं समेत्य रूस-देशात् तैल-क्रयण-परेषु देशेषु, प्रतिशतं शत-मितं शुल्कं प्रवर्तनीयम्। ध्यातव्यम् अस्ति यत् अमेरिकादेशेन पूर्वमेव प्रतिशतं पञ्चाशन्मितं टैरिफ शुल्कं प्रवर्तितं वर्तते, सम्प्रति तेन यूरोपीय-संघ: अपि भारते व्यापक-शुल्क-प्रवर्तनार्थं प्रोक्तः अस्ति, यद्धि यूक्रेन-युद्धं समापयितुं मास्को मध्ये आपीड-प्रदानार्थं तथाकथित-सामूहिक-प्रयासस्य अङ्गम् अस्ति। राष्ट्रपतिना अद्य वाशिंगटन-मध्ये अमेरिकाया: यूरोपीय-संघस्य च वरिष्ठाधिकारिभि: साकम् एकमुपवेशनम् आकारितं यत्र एष: प्रस्तावः उपस्थापित:। अमुना भणितं यद् अमेरिका अपि एतत् कर्तुं तत्परम् अस्ति परम् अमेरिका तदैव एतदाचरिष्यति यदा यूरोपीय संघ: अपि आचरिष्यति।

------------------------------------

## प्रधानमन्त्री-अमेरिका-घनिष्ठ-सम्बन्ध:

प्रधानमन्त्रिणा श्रीमोदिना प्रोक्तं यत् भारतामेरिकादेशौ स्वाभाविकतया नेदिष्ठ-मित्र-देशौ वर्तेते। असौ अवोचत् यत् अहं प्रत्यैमि यत् अस्माकं सम्भाषणोपवेशनम् उभयो: साहमत्यस्य असीम-सम्भावनानां मार्गं प्रशस्ती करिष्यति।

प्रधानमन्त्रिणा मोदिना डोनाल्ड ट्रम्पस्य सञ्जालीय: लेख: विनिमयीकृत्य साम्रेडितं यत् अस्माकं प्रयत्न: शीघ्रातिशीघ्रं चर्चा-समाधाने वर्तते। मोदिना प्रोक्तं यत् अहमपि राष्ट्रपतिना ट्रम्पेण समं सम्भाषणार्थम् उत्सुकोऽस्मि। वयम् उभयो: देशयो: कृते समुज्जवल-समृद्ध-भविष्यं सुनिश्चेतुं सम्भूय कार्यम् आचरिष्याम:। ध्येयम् अस्ति यत् डोनाल्ड ट्रम्पेण एकस्मिन् सञ्जालीये लेखे भारतं महत्त्वपूर्णं प्रतिपादयता श्रीमोदिना साकं सम्भाषणार्थं निजा उत्सुकतापि प्रकटिता आसीत्। तस्मिन्नेव लेखे श्रीमोदिन: प्रत्युत्तरम् आगतम् अस्ति। प्रधानमन्त्री मोदी प्रत्यपादयत् यत्

सोऽपि डोनाल्ड ट्रम्पेण साकं सम्भाषणम् आचरितुम् उत्सुको वर्तते। प्रधानमन्त्री एतदपि न्यगदत् यत् व्यापारिक-साहमत्य विषये कार्यं चलति परिणामश्च शोभन: भविष्यति इति आशास्यते।

------------------------------------

<u>उत्तराखण्डे सुरक्षासमेधनम्</u>

प्रतिवेशि-देशे नेपाले जाजायमानम् अशान्तिं राजनीतिकीम् अस्थिरतां च ध्यात्वा, उत्तराखण्डेन साकं संलग्ने भारत-नेपाल सीमनि सुरक्षाप्रबन्धा: समेधिता सुदृढीकताश्च सन्ति। सीमवर्ति क्षेत्रेषु एस.एस.बी. इति सीम-सुरक्षा-बलस्य, आरक्षि बलस्य च संयुक्त रूपेण गहन-निरीक्षणं अन्वेषणाभियानं च प्रचाल्यते। चम्पावतस्य जनपदाधीश: मनीष कुमार: प्रावोचत् यत् तत्र सीमनि सुरक्षा प्रबन्धा: सुतरां सुदृढीकृता: वर्तन्ते ।

------------------------------------

<u>उत्तराखण्ड चतुर्धामयात्राया: द्वितीय: चरण:</u>

उत्तराखण्डे चतुर्धामयात्राया: द्वितीय: चरण: प्रारम्भ: जात:। बदरीनाथ, केदारनाथ, गंगोत्री, यमुनोत्री चेति धामसु श्रद्धालूनां बृहती संख्या प्राप्नोति। ऋतो: प्रातिकूल्य-कारणेन मध्ये एषा यात्रा बाधिता आसीत्। हेलीकॉप्टर इति उदग्रविमान-यात्रा-सेवा: सितम्बर-पञ्चदशी-त: पुन: प्रारप्स्यन्ते।

अनया वैमानिक-सेवया वरिष्ठा: अस्वस्था: अशक्ताश्च तीर्थयात्रिण: सविशेषं लाभान्विता: भविष्यन्ति। प्रशासनेन श्रद्धालव: प्रार्थिता: सन्ति यत् यात्रायां गमनात् पूर्वं श्रद्धालव: ऋतो: अनुकूलताया: प्रतिकूलतास्याश्च विवरणं प्राप्य, सर्वेषां सुरक्षा-दिङ्निर्देशानां च पालनं कुर्यु:। गढ़वाल मण्डलस्य आयुक्त: विनय-शङ्कर:-पाण्डे वर्य: न्यगदत् यत् गंगोत्री यमुनोत्री मार्गेषु मार्गीया: समस्या: यथावस्थमेव सन्ति।

------------------------------------

## बिहार निवृत्तिभृतकम्

बिहारस्य मुख्यमन्त्री नीतीश-कुमार: अद्य चतुष्-षष्ट्युत्तर-द्वि-शत कोटिकानां रूप्यकाणां राशि: साक्षात् लाभान्तरणस्य माध्यमेन त्रयोदश-लक्षोत्तर-एक-कोटिकेभ्य: पेंशन इति निवृत्ति-भृतक-धारकेभ्य: वितरितवान्। ध्यातव्यमस्ति यत् नूतन-व्यवस्थाया: अन्तर्गतम् अधुना लाभार्थिभ्य: प्रतिमासं एकादश-शतं रूप्यकाणि प्रदास्यन्ते । पूर्वम् एषः राशि: चतुश्शतमेव आसीत् ।

-------------------------------------

## भारतीय-ऋतुविज्ञान

भारतीय-ऋतुविज्ञान-विभागेन आगामिषु पञ्चदिवसेषु पूर्वीयभारते प्रायद्वीपीय-भारते च तीव्रवृष्टेः अनुमानं व्यक्तीकृतम्। उक्तं च यत् अस्य मासस्य षोडशदिनाङ्कं यावत् हिमालयं निकषा पश्चिम-बंगाल,सिक्किम, ओडिशा,अरुणाचलप्रदेश, नागालैण्ड, मणिपुर, असम, मेघालय चेति राज्याणां कतिपयेषु स्थानेषु तीव्रात् तीव्रतर-वृष्टेः सम्भावना वर्तते। अस्य मास्य चतुर्दश-दिनाङ्क-पर्यन्तं उत्तरप्रदेश-जम्मू-कश्मीर-हिमाचलप्रदेश-उत्तराखण्ड-राज्यानाम् अपि कतिपयेषु स्थानेषु गर्जनेन सह अल्प-मध्यमवृष्टि: सम्भाव्यते तत्रैव कतिचित्स्थलेषु अतिवृष्टेः सम्भावना अस्ति। आगामिषु पञ्च-दिवसेषु कर्णाटके, तटीय-आन्ध्रप्रदेशे, तेलङ्गानायाम्, केरले च विभिन्नेषु स्थलेषु वातावरणस्य स्थितिः एवमेव सम्भाव्यते।

-------------------------------------

## एशिया-चषकीय क्रिकेट-स्पर्धा

एशिया-चषकीय क्रिकेट-स्पर्धा-शृङ्खलायां, भारतम् ग्रुप-ए वर्गे अद्य सायं दुबई नगरे आयोजकं संयुक्त-अरब-अमीरात दलं विरुध्य निजाभियानं प्रवर्तयितुं तत्परम् अस्ति। गतरात्रौ औद्घाटनिके द्वन्द्वे अफगानिस्तान दलेन आबूधाबी क्रिकेट प्राङ्गणे हांगकांग-दलं चतुर्णवति-धावनाङ्कैः पराभूतम्। एतद् हि ग्रुप-बी वर्गीयं द्वन्द्वम् आसीत् यत्र श्रीलंका-बांग्लादेशौ अपि समाविष्टौ स्त:।

-------------------------------------

**<u>यूरोपीय-संघः</u>**

यूरोपीय-संघेन भारतेन च ह्यः ब्रुसेल्स्-नगरे आतंकवाद-निरोधाय संयुक्तकार्यदलस्य पञ्चदश उपवेशनस्य आयोजनं कृतम् । अस्य संवादस्य सहाध्यक्षतां यूरोपीय-विदेश-क्रियासेवायां सुरक्षा-नीतिनिदेशकः मैसीज स्टेडजेक एवं विदेशमन्त्रालये संयुक्तसचिवः के.डी. देवलः च कृतवन्तौ। विदेशमन्त्रालयेन एकस्मिन् वक्तव्ये उक्तं यत् उभयपक्षौ अप्रैलमासस्य द्वाविंशे दिनाङ्के पहलगाम-क्षेत्रे दरापन्नम् आतङ्कवाद्याक्रमणं निन्दितवन्तौ। यूरोपीय-सङ्घेन निर्दोष-नागरिकाणां हननविषये भारतं प्रति स्वीया संवेदना पुनः प्रकटिता। उभयपक्षाभ्याम् सर्वरूपेषु आतङ्कवादस्य कठोर-निन्दा कृता। तैः अङ्गीकृतं यत् आतङ्कवादः वैश्विक-समस्या वर्तते सहैव अस्य निराकरणाय दृढपदक्षेपाणां आवश्यकतास्ति।

।। इति वार्ता:।।